# શિવભુજઙ્ગ પ્રયાત સ્તોત્રમ

## Shivabhujanga Prayaata Stotram

---

શિવભુજઙ્ગ પ્રયાત સ્તોત્રમ |

ગલદ્દાનગણ્ડં મિલદ્ભૃઙ્ગખણ્ડં ચલચ્ચારુશુણ્ડં જગત્રાણશૌણ્ડં |
લસદ્દન્તકાણ્ડં વિપદ્ભઙ્ગચણ્ડં શિવપ્રેમપિણ્ડં ભજે વક્રતુણ્ડમ||૧||

અનાદ્યન્તમાદ્યં પરન્તત્ત્વમર્થં ચિદાકારમેકં તુરીયં ત્વમેયમ |
હરિબ્રહ્મમૃગ્યં પરબ્રહ્મરૂપં મનોવાગતીતં મહઃ શૈવમીડે ||૨||

સ્વશક્ત્યાદિ શક્ત્યન્તસિંહાસનસ્થં મનોહારિસર્વાંગરત્નાદિભૂષમ |
જટાહીંદુગંગાસ્થિશશ્યર્કમૌલિં પરં શક્તિમિત્રં નુમઃ પઞ્ચવક્ત્રમ ||૩||

શિવેશાનતત્પૂરુષાઘોરવામાદિભિર્બ્રહ્મભિર્હન્મુખૈઃ ષડ્ભિરંગૈઃ |
અનૌપમ્યષટ્ત્રિંશતં તત્ત્વવિદ્યામતીતં પરં ત્વાં કથં વેત્તિ કો વા ||૪||

પ્રવાળપ્રવાહપ્રભાશોણમર્ધં મરુત્વન્મણિશ્રીમહઃ શ્યામમર્ધમ |
ગુણસ્યૂતમેકં વપુશ્ચેકમન્તઃ સ્મરામિ સ્મરાપત્તિસંપત્તિહેતુમ ||૫||

સ્વસેવાસમાયાત દેવાસુરેન્દ્રા નમન્મૌલિમન્દારમાલાભિષિક્તમ |
નમસ્યામિ શંભો પદાંભોરુહં તે ભવાંભોધિપોતં ભવાનીવિભાવ્યમ ||૬||

જગન્નાથ મન્નાથ ગૌરીસનાથ પ્રપન્નાનુકંપિન્વિપન્નાર્તિહારિન |
મહઃ સ્તોમમૂર્તે સમસ્તૈકબન્ધો નમસ્તે નમસ્તે પુનસ્તે નમોઽસ્તુ ||૭||

મહાદેવ દેવેશ દેવાધિદેવ સ્મરારે પુરારે યમારે હરેતિ |
બ્રુવાણઃ સ્મરિષ્યામિ ભક્ત્યા ભવન્તં તતો મે દયાશીલ દેવ પ્રસીદ ||૮||

વિરૂપાક્ષ વિશ્વેશ વિદ્યાદિકેશ ત્રયીમૂલ શંભો શિવ ત્ર્યંબક ત્વમ |
પ્રસીદ સ્મર ત્રાહિ પશ્યાવ પુણ્ય ક્ષમસ્વાપ્નુહિ ત્ર્યક્ષ પાહિ ત્વમસ્માન ||૯||

ત્વદન્યઃ શરણ્યઃ પ્રપન્નસ્ય નેતિ પ્રસીદ સ્મરન્નવ હન્યાસ્તુ દૈન્યમ |
ન ચેત્તે ભવેદ્ભક્તવાત્સલ્યહાનિસ્તતો મે દયાળો દયાં સન્નિધેહિ ||૧૦||

અયં દાનકાલસ્ત્વહં દાનપાત્રં ભવાન્નાથ દાતા ત્વદન્યન્ન યાચે |
ભવદ્ભક્તિમેવ સ્થિરાં દેહિ મહ્યં કૃપાશીલ શંભો કૃતાર્થોઽસ્મિ તસ્માત ||૧૧||

પશું વેત્સિ ચેન્માં ત્વમેવાધિરૂઢઃ કળંકીતિ વા મૂર્ધ્નિ ધત્સે ત્વમેવ |

દ્વિજિહ્વઃ પુનઃ સોઽપિ તે કણ્ઠભૂષા ત્વદઙ્ગીકૃતાઃ શર્વ સર્વેઽપિ ધન્યાઃ ||૧૨||

ન શક્નોમિ કર્તું પરદ્રોહલેશં કથં પ્રીયસે ત્વં ન જાને ગિરીશ |
તદા હિ પ્રસન્નોઽસિ કસ્યાપિ કાન્તાસુતદ્રોહિણો વા પિતૃદ્રોહિણો વા ||૧૩||

સ્તુતિં ધ્યાનમર્ચાં યથાવદ્વિધાતું ભજન્નપ્યજાનન્મહેશાવલંબે |
ત્રસન્તં સુતં ત્રાતુમગ્રે મૃકણ્ડોર્યમપ્રાણનિર્વાપણં ત્વત્પદાબ્જમ ||૧૪||

અકણ્ઠે કળઙ્કાદનઙ્ગે ભુજઙ્ગાદપાણૌ કપાલાદભાલેઽનલાક્ષાત |
અમૌલૌ શશાઙ્કાદવામે કળત્રાદહં દેવમન્યં ન મન્યે ન મન્યે ||૧૫||

શિરોદૃષ્ટિહૃદ્રોગશૂલપ્રમેહજ્વરાર્શોજરાયક્ષ્મહિક્કાવિષાર્તાન |
ત્વમાદ્યો ભિષગ્ભેષજં ભસ્મ શંભો ત્વમુલ્લાઘયાસ્માન્વપુર્લાઘવાય ||

દરિદ્રોઽસ્મ્યભદ્રોઽસ્મિ દૂયે વિષણ્ણોઽસ્મિ સન્નોઽસ્મિ ભિન્નોઽસ્મિ ચાહમ |
ભવાન્પ્રાણિનામન્તરાત્માસિ શંભો મમાધિં ન વેત્સિ પ્રભો રક્ષ માં ત્વમ ||૧૬||

ત્વદક્ષ્ણોઃ કટાક્ષઃ પતેત ત્ર્યક્ષ યત્ર ક્ષણં ક્ષ્મા ચ લક્ષ્મીઃ સ્વયં તં વૃણીતે |
કિરીટસ્ફુરચ્ચામરચ્છત્રમાલાકલાચીગજક્ષામભૂષાવિશેષૈઃ ||૧૭||

ભવાન્યૈ ભવાયાપિ માત્રે ચ પિત્રે મૃડાન્યૈ મૃડાયાપ્યઘઘ્ને  મખઘ્ને |
શિવાઙ્ગ્યૈ શિવાઙ્ગાય કુર્મઃ શિવાયૈ શિવાયામ્બિકાયૈ નમસ્ત્ર્યમ્બકાય ||૧૮||

ભવદ્ગૌરવં મલ્લઘુત્વં વિદિત્વા પ્રભો રક્ષ કારુણ્યદૃષ્ટ્યાનુગં મામ |
શિવાત્માનુભાવસ્તુતાવક્ષમોઽહં સ્વશક્ત્યા કૃતં મેઽપરાધં ક્ષમસ્વ ||૧૯||

યદા કર્ણરન્ધ્રં વ્રજેત્કાલવાહદ્વિષત્કણ્ઠઘણ્ટાઘણાકારનાદઃ |
વૃષાધીશમારુહ્ય દેવૌપવાહ્યં તદા વત્સ મા ભીરિતિ પ્રીણય ત્વમ ||૨૦||

યદા દારુણા ભાષણા ભીષણા મે ભવિષ્યન્ત્યુપાન્તે કૃતાન્તસ્ય દૂતાઃ |
તદા મન્મનસ્ત્વત્પદામ્ભોરુહસ્થં કથં નિશ્ચલં સ્યાન્નમસ્તેઽસ્તુ શંભો||૨૧||

યદા દુર્નિવારવ્યથોઽહં શયાનો લુઠન્નિઃશ્વસન્નિઃસૃતા વ્યક્તવાણિઃ |
તદા જહ્નુકન્યાજલાલઙ્કૃતં તે જટામણ્ડલં મન્મનોમન્દિરં સ્યાત ||૨૨||

યદા પુત્રમિત્રાદયો મત્સકાશે રુદન્ત્યસ્ય હા કીદૃશીયં દશેતિ |
તદા દેવદેવેશ ગૌરીશ શંભો નમસ્તે શિવાયેત્યજસ્રં બ્રવાણિ || ૨૩||

યદા પશ્યતાં મામસૌ વેત્તિ નાસ્માનયં શ્વાસ એવેતિ વાચો ભવેયુઃ |
તદા ભૂતિભૂષં ભુજઙ્ગાવનદ્ધં પુરારે ભવન્તં સ્ફુટં ભાવયેયમ ||૨૪||

યદા યાતનાદેહ સન્દેહવાહી ભવેદાત્મદેહે ન મોહો મહાન્મે |
તદા કાશશીતાંશુસઙ્કાશમીશ સ્મરારે વપુસ્તે નમસ્તે સ્મરાણિ ||૨૫||

યદા પારમચ્છાયમસ્થાનમદ્ભિર્જનૈર્વા વિહીનં ગમિષ્યામિ માર્ગમ |
તદા તં નિરુબ્ધન્કૃતાન્તસ્ય માર્ગં મહાદેવ મહ્યં મનોજ્ઞં પ્રયચ્છ ||૨૬||

યદા રૌરવાદિ સ્મરન્નેવ ભીત્યા વ્રજામ્યત્ર મોહં મહાદેવ ઘોરમ |
તદા મામહો નાથ તસ્તારયિષ્યત્યનાથં પરાધીનમર્ધેન્દુમૌલે ||૨૭||

યદા શ્વેતપત્રાયતાલઙ્ઘ્યશક્તેઃ કૃતાન્તાદ્ભયં ભક્તવાત્સલ્યભાવાત |
તદા પાહિ માં પાર્વતીવલ્લભાન્યં ન પશ્યામિ પાતારમેતાદૃશં મે ||૨૮||

ઇદાનીમિદાનીં મૃતિર્મે ભવિત્રીત્યહો સન્તતં ચિન્તયા પીડિતોઽસ્મિ |
કથં નામ મા ભૂન્મૃતૌ ભીતિરેષા નમસ્તે ગતીનાં ગતે નીલકણ્ઠ ||૨૯||

અમર્યાદમેવાહમાઽઽબાલવૃદ્ધં હરન્તં કૃતાન્તં સમીક્ષ્યાસ્મિ ભીતઃ |
મૃતૌ તાવકાઙ્ઘ્ર્યબ્જદિવ્યપ્રસાદાદ્ભવાનીપતે નિર્ભયોઽહં ભવાનિ ||૩૦||

જરાજન્મગર્ભાધિવાસાદિદુઃખાન્યસહ્યાનિ જહ્યાં જગન્નાથદેવ |
ભવન્તં વિના મે ગતિર્નૈવ શંભો દયાળો ન જાગર્તિ કિં વા દયા તે || ૩૧||

શિવાયેતિ શબ્દો નમઃપૂર્વ એષ સ્મરન્મુક્તિકૃન્મૃત્યુહા તત્ત્વવાચી |
મહેશાન મા ગાન્મનસ્તો વચસ્તઃ સદા મહ્યમેતત્પ્રદાનં પ્રયચ્છ ||૩૨||

ત્વમત્યમ્બ માં પશ્ય શીતાંશુમૌલિપ્રિયે ભેષજં ત્વં ભવવ્યાધિશાન્તૌ |
બહુક્લેશભાજં પદામ્ભોજપોતે ભવાબ્ધૌ નિમગ્નં નયસ્વાદ્યપારમ || ૩૩||

અનુદ્યલ્લલાટાક્ષિવહ્નિપ્રરોહૈરવામસ્ફુરચ્ચારુવામોરુશોભૈઃ |
અનઙ્ગભ્રમદ્ભોગિભૂષાવિશેષરચન્દ્રાર્ધચૂડૈરલં દૈવતૈર્નઃ || ૩૪||

અકણ્ઠે કલઙ્કાદનઙ્ગે ભુજઙ્ગાદપાણૌ કપાલાદભાલેઽનલાક્ષાત |
અમૌલૌ શશાઙ્કાદવામે કળત્રાદહં દેવમન્યં ન મન્યે ન મન્યે ||૩૫||

મહાદેવ શંભો ગિરીશ ત્રિશૂલિંસ્ત્વયીદં સમસ્તં વિભાતીતિ યસ્માત |
શિવાદન્યથા દૈવતં નાભિજાને શિવોઽહં શિવોઽહં શિવોઽહમ ||૩૬||

યતોઽજાયતેદં પ્રપઞ્ચં વિચિત્રં સ્થિતિં યાતિ યસ્મિન યદેકાન્તમન્તે |
સ કર્માદિહીનઃ સ્વયંજ્યોતિરાત્મા શિવોઽહં શિવોઽહં શિવોઽહમ ||૩૭||

કિરીટે નિશેશો લલાટે હુતાશો ભુજે ભોગિરાજો ગલે કાલિમા ચ |
તનૌ કામિની યસ્ય તત્તુલ્યદેવં ન જાને ન જાને ન જાને || ૩૮||

અનેન સ્તવેનાદરાદમ્બિકેશં પરાં ભક્તિમાસાદ્ય યં યે નમન્તિ |
મૃતૌ નિર્ભયાસ્તે જનાસ્તં ભજન્તે હૃદમ્ભોજમધ્યે સદાસીનમીશમ || ૩૯||

ભુજઙ્ગપ્રિયાકલ્પ શમ્ભો મયૈવં ભુજઙ્ગપ્રયાતેન વૃત્તેન ક્લૃપ્તમ |
નરઃ સ્તોત્રમેતત્પઠિત્વોરુભક્ત્યા સુપુત્રાયુરારોગ્યમૈશ્વર્યમેતિ || ૪૦||

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય શ્રીમચ્છઙ્કરાચાર્ય
વિરચિતં શિવભુજઙ્ગ પ્રયાતસ્તોત્રં સંપૂર્ણમ ||

**www.shaivam.org**